स्तेन विशेषणं सम्भवति नीलेनेवोत्पलस्य। तस्मान्नित्यमेवाकाशेन साधारणं ब्रह्मेति गम्यते" भा०। "स्याच्चैकस्य ब्रह्मशब्दवत्" सू०। इदंपदोत्तरं सूत्रम्। स्यादेतत् कथं पुनरेकस्य सम्भूतशब्दस्य तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यस्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्त्तमानस्य मुख्यत्वं आकाशे च गौणत्वमिति। अत उत्तरमुच्यते। स्याच्चैकस्यापि सम्भूतशब्दस्य विषयविशेषवशाद्गौणोमुख्यश्च प्रयोगः ब्रह्मशब्दवत्। यथैकस्यापि ब्रह्मशब्दस्य "तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्म" इत्यस्मिन्नधिकारेऽन्नादिषु गौणः प्रयोग आनन्दे च मुख्यः यथा च तपसि ब्रह्मविज्ञानसाधने ब्रह्मशब्दोभक्त्या प्रयुज्यते अञ्जसा तु विज्ञेये ब्रह्मणि तद्वत्। कथं पुनरनुत्पत्तौ नभसः "एकमेवाद्वितीय" मितीयं प्रतिज्ञा समर्थ्यते। ननु नभसा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति, कथञ्च ब्रह्मणि विदिते सर्व्वं विदितं स्यादिति। तदुच्यते। एकमेवेति तावत्कार्य्यापेक्षयोपपद्यते। यथा लोके कश्चित् कुम्भकारकुले पूर्व्वेद्युर्मृदं दण्डचक्रादीनि चोपलभ्यापरेद्युश्च नानाविधान्यमत्राणि प्रसारितान्युपलभ्य ब्रूयात् मृदेवेहैकाकिनी पूर्व्वेद्युरासीदिति। स च तयावधारणया मृत्कार्य्यजातमेव पूर्व्वेद्युर्नासीदित्यभिप्रेयात् न चक्रदण्डादि तद्वत्। अद्वितीयश्रुतिरधिष्ठात्रन्तरं वारयति यथा मृदोऽमत्रप्रकृतेः कुम्भकारोऽधिष्ठाता दृश्यते नैवं ब्रह्मणोजगत्प्रकृतेरन्योऽधिष्ठितास्तीति। न च नभसापि द्वितीयेन सद्वितीयं ब्रह्म प्रसज्यते। लक्षणान्यत्वनिमित्तं हि नानात्वं न च प्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति। क्षीरोदकयोरिव संसृष्टयोर्व्यापित्वामूर्त्तत्वादिधर्म्मसामान्यात्। सर्गकाले तु ब्रह्म जगदुत्पादयितुं यतते स्तिमितमितरत्तिष्ठति तेनान्यत्वमवसीयते। तथाकाशशरीरं ब्रह्मेत्यादि श्रुतिभ्योपि ब्रह्माकाशयोरभेदोपचारसिद्धिः। अतएव च ब्रह्मविज्ञानेन सर्वविज्ञानसिद्धिः। अपि च सर्वं कार्य्यमुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणा चाव्यतिरिक्तदेशकालमेवाकाशं भवतीत्यतो ब्रह्मणा तत्कार्य्येण च विज्ञातमेवाकाशं भवति यथा क्षीरपूर्णे घटे कतिचिदब्बिन्दवः प्रक्षिप्ताः सन्तः क्षीरग्रहणेनैव गृहीता भवन्ति। न हि क्षीरग्रहणादब्बिन्दुग्रहणं परिशिष्यते एवं ब्रह्मणा तत्कार्य्यैश्चाव्यतिरिक्तदेशकालत्वाद्गृहीतमेव ब्रह्मग्रहणेन नभो भवति। तस्माद्भाक्तं नभसः सम्भवश्रवणमिति एवं प्राप्ते इदमाह। 'प्रतिज्ञाऽहानिरव्यतिरेकात्शब्देभ्य"ः।सू० "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति" "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमिति" "कस्मिन्नु भगवोविज्ञाते सर्वमिदं विज्ञातं भवतीति" न काचन मद्बहिर्वा विद्यास्तीति 'चैवंरूपा प्रतिवेदान्तं प्रतिज्ञा विज्ञायते तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्यात् यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्यात्। व्यतिरेके हि सत्येकविज्ञानेन सर्वं विज्ञायत इतीयं प्रतिज्ञा हीयेत। सचाव्यतिरेक एवमुपपद्यते यदि कृत्स्नं वस्तुजातमेकस्मात् ब्रह्मण उत्पद्यते। शब्देभ्यश्च प्रकृतिविकारव्यतिरेकन्यायेनैव प्रतिज्ञासिद्धिरवगम्यते। तथा हि "येनाश्रुतं श्रुतं भवतीति" प्रतिज्ञाय मृदादिदृष्टान्तैः कार्य्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते। तत्साधनायैव चोत्तरे शब्दाः "सदेव सोम्येदमग्र आसीत्" "एकमेवाद्वितीयं ब्रह्म" "तदैक्षत तत्तेजो सृजते" इत्येवंकार्य्यजातं ब्रह्मणः प्रदर्श्याव्यतिरेकं प्रदर्शयन्ति "ऐतदात्म्यमिदं सर्व्वम्" इत्यारभ्या प्रपाठकपरिसमाप्तेः। तद्यद्याकाशं न ब्रह्मकार्यं स्यात् न ब्रह्मणि विज्ञाते आकाशं विज्ञायेत ततश्च प्रतिज्ञाहानिः स्यात्। न च प्रतिज्ञाहान्या वेदस्याप्रामाण्यं युक्तं कर्त्तुम्। तथा च प्रतिवेदान्तं ते ते शब्दास्तेन तेन दृष्टान्तेन तामेव प्रतिज्ञां ज्ञापतन्ति "इदं सर्वं यदयमात्मा" "ब्रह्मैवेदममृतं पुरस्तात्" इत्येवमादयः। तस्मात् ज्वलनादिवदेव गगनमप्युत्पद्यते। यदुक्तमश्रुतेर्न वियदुत्पद्यत इति तदयुक्तं वियदुत्पत्तिविषयस्य श्रुत्यन्तरस्य दर्शितत्वात् "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इति। सत्यं दर्शितं विरुद्धन्तु "तत्तेजोऽसृजत" इत्यनेन श्रुत्यन्तरेण। न एकवाक्यत्वात् सर्वश्रुतीनाम्। भवत्वेकवाक्यत्वमविरुद्धानाम् इह तु विरोध उक्तः। सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसम्बन्धासम्भवात्, द्वयोश्च प्रथमजत्वासम्भवाद्विकल्पासम्भवाच्चेति। नैष दोषः तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात् 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निरिति"। अशक्या हीयं श्रुतिरन्यथा परिणेतुम्। शक्या तु परिणेतुं छान्दोग्यश्रुतिः तदाकाशं वायुञ्च सृष्ट्वा "तत्तेजोऽसृजतेति"। न हीयं श्रुतिस्तेजोजनिप्रधाना सती श्रुत्यन्तरप्रसिद्धामाकाशस्योत्पत्तिं वारयितुं शक्नोति एकस्य वाक्यस्य व्यापारद्वयासम्भवात्। स्रष्टा त्वेकोपि क्रमेणानेकं स्रष्टव्यं सृजेत् इत्येकवाक्यत्वकल्पनायां सम्भवन्त्यां न विरुद्धार्थत्वेन श्रुतिर्हातव्या। नचास्माभिः सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वय